# advayatAraka

## અદ્વયતારક

## Document Information

Text title : advayatAraka

File name : advayataarak.itx

Category : vedanta, upanishhat

Location : doc_upanishhat

Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com

Proofread by : Sorin Suciu aka SeSe at sorins at hotmail.com

Latest update : October 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# advayatAraka

# અદ્વયતારક

॥ શ્રીઃ ॥

ઉપનિષદ્બ્રહ્મયોગિવિરચિતં વિવરણમ્

શ્રીમદપ્પયશિવાચાર્યવિરચિતભાષ્યોપેતા

Invocation

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

Text

વ્યાખ્યેયો વિષયઃ તદધિકારી ચ

Ed . II . tArakayogAdhikAraH .

અથાતોઽદ્વયતારકોપનિષદં વ્યાખ્યાસ્યામઃ ।
યતયે જિતેન્દ્રિયાય શમાદિષડ્ગુણપૂર્ણાય ॥ ૧॥

Commentary I.

શ્રીમદ્વિશ્વાધિષ્ઠાનપરમહંસસદ્ગુરુરામચન્દ્રાય નમઃ
દ્વૈતાસમ્ભવવિજ્ઞાનસંસિદ્ધાદ્વયતારકં ।
તારકબ્રહ્મેતિ ગિતં વન્દે શ્રીરામવૈભવં ॥

ઇહ ખલુ શુક્લયજુર્વેદપ્રવિભક્તેયં અદ્વયતારકોપનિષત્
રાજયોગસર્વસ્વં પ્રકટયન્તી બ્રહ્માત્રપર્યવસન્ના દૃશ્યતે ।
અસ્યાઃ સ્વલ્પગ્રન્થતો વિવરણમારભ્યતે । અત્ર
યથોક્તાધિકાર્યુદ્દેશેન
શ્રુતયઃ તારકયોગમુપદિશન્તીત્યાહ – અથેતિ ॥ અથ
કર્મોપાસનાકાણ્ડદ્વયનિરૂપણાનન્તરં યતઃ તેન
પુરુષાર્થાસિદ્ધિઃ
અતઃ તદર્થં યત્ર સ્વાતિરેકેણ દ્વયં ન વિદ્યતે તત્ અદ્વયં

બ્રહ્મ
તન્માત્રબોધિની વિદ્યા તારકોપનિષત્ તાં શ્રુતયો વયં
વ્યાખ્યાસ્યામઃ ।
કસ્મા અધિકારિણ ઇત્યત આહ – યતય ઇતિ ।
સ્વાશ્રમાનુષ્ઠનપૂર્વકં
દેશિકંઉખતો વેદન્તશ્રવણં તતો યુક્તિભિઃ
શ્રુત્યવિરુધ્દ્ધાભિઃ
મનનં ચ કૃત્વા નિદિધ્યસાનાય યતત ઇતિ યતિઃ ।
અજિતેન્દ્રિયસ્ય
યતિત્વં કુત ઇત્યત આહ – જિતેન્દ્રિયાયેતિ । જિતેન્દ્રિયસ્ય
યતિત્વોપપત્તેઃ ।
અરિષડ્વર્ગાક્રાન્તસ્ય જિતેન્દ્રિયતા કુત ઇત્યત આહ –
શમાદિષડ્ગુણપૂર્ણાયેતિ । શમાદિષડ્ગુણસમ્પત્તેઃ
અરિષડ્વર્ગોપરતિપૂર્વકત્વાત્ । એવં સાધનવતે શ્રુતયઃ
તારકયોગમુપદિશન્તીત્યર્થઃ ॥ ૧॥

Text

યોગોપાય તત્ફલમ્

Ed . II . yogAnuShThAnaM tatphalaM cha .

ચિત્સ્વરૂપોઽહમિતિ સદા ભવયન્ સમ્યઙ્નિમીલિતાક્ષઃ
કિઞ્ચિદુન્મીલિતાક્ષો વાઽન્તર્દૃષ્ટ્યા ભ્રૂદહરાદુપરિ
સચ્ચિદાનન્દતેજઃકૂટરૂપં પરં બ્રહ્માવલોકયન્ તદ્રૂપો
ભવતિ ॥ ૨॥

Commentary I.

એવં નિદિધ્યસાનોપાયતત્ફલમાહ – ચિદિતિ ॥ યોગી સ્વાન્તઃ
ચિદ્રૂપોઽસ્મીતિ ભવયનર્ધોન્મીલિતલોચનઃ ભ્રૂમધ્યાદૌ
સચ્ચિદાનન્દમાત્રં બ્રહ્માહમસ્મીત્યાલોકયન્તદ્રૂપસ્તારકરૂપો
ભવતિ ॥ ૨॥

Text

અદ્વયતારકપદાર્થૌ

ગર્ભજન્મજરામરણભયાત્સંતારયતિ તસ્માત્તારકમિતિ ।
જીવેશ્વરૌ માયિકાવિતિ વિજ્ઞાય સર્વવિશેષં નેતિ નેતીતિ

વિહાય
યદવશિષ્યતે તતદ્વયં બ્રહ્મ ॥ ૩॥

Commentary I.

કિં તારકમિત્યતાહ – ગર્ભેતિ ॥ જ્યોતિર્લિઙ્ગં ભ્રુવોર્મધ્યે
નિત્યં ધ્યાયેત્સદા યતિઃ । ઇતિ શ્રુતિસિદ્ધજ્યોતિર્લિઙ્ગસ્ય
પ્રત્યગ્રૂપત્વેન
સ્વાજ્ઞવિકલ્પિતગર્ભાસાદિસંસારતારકત્વાત્તારકં
પ્રત્યગાત્મેત્યર્થઃ । જીવેશભેદે સતિ
પ્રત્યગભિન્નબ્રહ્મભાવઃ કુત
ઇત્યાશઙ્ક્ય તયોર્ભેદસ્ય માયિકત્વેન મિથ્યાત્વાત્તતો યચ્છિષ્યતે
તદેવ
બ્રહ્મેત્યાહ – જીવેતિ ॥ ૩॥

Text

લક્ષ્યત્રયાનુસન્ધાનવિધિઃ

Ed . II . tadadhigamopAyaH

તત્સિદ્ધ્યૈ લક્ષ્યત્રયાનુસંધાનં કર્તવ્યં ॥ ૪॥

Commentary I.

તદધિગમોપાયઃ કથમિત્યત આહ તત્સિદ્ધ્યા ઇતિ ॥ ૪॥

Commentary II.

પરિચ્છિન્નજ્યોતીરૂપલક્ષ્યાનુસન્ધાનસ્યાપિ
ચિત્તશુદ્ધિફલકત્વમ્
મૂર્તામૂર્તાત્મકં યત્ર તારકદ્વયમુચ્યતે ।
જ્યોતિર્દર્શનમાર્ગોક્તિં વ્યખ્યાસ્યેઽદ્વયતારકં ॥

નનુ – જીવેશ્વરૌ માયિકાવિતિ વિજ્ઞાય સર્વવિશેષં નેતિ
નેતીતિ
વિહાય યદવશિષ્યતે તતદ્વયં બ્રહ્મ ઇતિ યદુક્તં તદ્ યુક્તમેવ ।
અપિ તુ – તત્સિદ્ધ્યૈ લક્ષ્યત્રયાનુસંધાનં કર્તવ્યં
ઇત્યેતદયુક્તં ।
કુતઃ લક્ષ્યત્રયસ્ય ચ દેહાન્તર્ગતત્વેન
પરિચ્છિન્નજ્યોતિઃસ્વરૂપતયા

સ્વયમપરિચ્છિન્નત્વાભાવાત્ । અદ્વયબ્રહ્મ હિ અપરિચ્છિન્નં
મહાકાશવત્
પ્રસિદ્ધં । તત્સિદ્ધ્યૈ પરિચ્છિન્નલક્ષ્યત્રયાનુસન્ધાનં કથં
સાધનં સ્યાત્ । અપરિચ્છિન્નબ્રહ્મસિદ્ધ્યૈ હિ
અપરિચ્છિન્નબ્રહ્મધ્યાનં
કર્તવ્યં । અતઃ ઇહ વિરુદ્ધમુક્તિમિતિ ચેત્ – સત્યમેવૈતત્ ।
તથાપિ
ઉક્તલક્ષ્યત્રયાનુસન્ધાનદ્વારા સંશુદ્ધચિત્તસ્યૈવ
વાક્યાર્થશ્રવણમનનસંસ્કૃતાન્તઃકરણવશીકરણપૂર્વકાપ્
અરિચ્છિન્ન-
બ્રહ્માત્મૈક્યાનુસન્ધાનકરણસામર્થ્યસંભવાત્ ।
અન્યથા દેહમધ્યગતજ્યોતિર્દર્શનહીનત્ય
વાક્યાદિશ્રવણાદિપ્રવૃત્ત્યસંભવાચ્ચ પરિચ્છિન્નાનુસન્ધાનં
યુક્તિમિત્યનુસન્ધાનં ॥ ૧-૪॥

Text

અન્તર્લક્ષ્યલક્ષણમ્

દેહમધ્યે બ્રહ્મનાડી સુષુમ્ના સૂર્યરૂપિણી પૂર્ણચન્દ્રાભા
વર્તતે । સા તુ મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રગામિની ભવતિ ।
તન્મધ્યે તટિત્કોટિસમાનકાન્ત્યા મૃણાલસૂત્રવત્ સુક્ષ્માઙ્ગી
કુણ્ડલિનીતિ પ્રસિદ્ધાઽસ્તિ । તાં દૃષ્ટ્વા મનસૈવ નરઃ
સર્વપાપવિનાશદ્વારા મુક્તો ભવતિ ।
ફાલોર્ધ્વગલલાટવિશેષમણ્ડલે નિરન્તરં
તેજસ્તારકયોગવિસ્ફુરણેન પશ્યતિ ચેત્ સિદ્ધો ભવતિ ।
તર્જન્યગ્રોન્મીલિતકર્ણરન્ધ્રદ્વયે તત્ર ફૂત્કારશબ્દો જાયતે ।
તત્ર
સ્થિતે મનસિ ચક્ષુર્મધ્યગતનીલજ્યોતિસ્સ્થલં વિલોક્ય
અન્તર્દૃષ્ટ્યા
નિરતિશયસુખં પ્રાપ્નોતિ । એવં હૃદયે પશ્યતિ ।
એવમન્તર્લક્ષ્યલક્ષણં મુમુક્ષુભિરુપાસ્યં ॥ ૫॥

Commentary I.

અન્તર્બાહ્યમધ્યભેદેન લક્ષ્યં ત્રિવિધં । તત્ર

અન્તર્લક્ષ્યલક્ષણં
તદભ્યાસફલં ચાહ – દેહેતિ ॥ યદા કુણ્ડલિની
પ્રાણદૃષ્ટિમનોગ્નિભિઃ
મૂલાધારત્રિકોણાગ્રાલઙ્કારસુષુમ્નાડધોવક્ત્રં વિભિદ્ય
તન્મધ્યે
પ્રવિશતિ તદા બાહ્યાન્તઃપ્રપઞ્ચવિસ્મરણપૂર્વકં
મુન્યન્તઃકરણં
નિર્વિકલ્પબ્રહ્મપદં ભજતિ । મુનિઃ નિર્વિકલ્પજ્ઞાનાત્ વિકલ્પાત્
મુક્તો
ભવતીત્યર્થઃ । તત્સિદ્ધ્યુપાયઃ કઃ ઇત્યત આહ – ફાલેતિ ।
તદ્ગતસુખાનુભવોપાયં વદન્ અન્તર્લક્ષ્યં ઉપસંહરતિ –
તર્જનીતિ ।
સુખં પ્રાપ્નોતિ ન કેવલં કર્ણરન્ધ્રદ્વયે એવં હૃદયે ॥ ૫॥

Text

બહિર્લક્ષ્યલક્ષણમ્

અથ બહિર્લક્ષ્યલક્ષણં । નાસિકાગ્રે ચતુર્ભિઃ
ષડ્ભિરષ્ટભિઃ
દશભિઃ દ્વાદશભિઃ ક્રમાત્ અઙ્ગુલાલન્તે
નીલદ્યુતિશ્યામત્વસદૃગ્રક્તભઙ્ગીસ્ફુરત્પીતવર્ણદ્વયોપેતં
વ્યોમ
યદિ પશ્યતિ સ તુ યોગી ભવતિ । ચલદૃષ્ટ્યા
વ્યોમભાગવીક્ષિતુઃ
પુરુષસ્ય દૃષ્ટ્યગ્રે જ્યોતિર્મયૂખા વર્તતે । તદ્દર્શનેન યોગી
ભવતિ ।
તપ્તકાઞ્ચનસઙ્કાશજ્યોતિર્મયૂખા અપાઙ્ગાન્તે ભૂમૌ વા
પશ્યતિ
તદ્દૃષ્ટિઃ સ્થિરા ભવતિ । શિર્ષોપરિ
દ્વાદશાઙ્ગુલસમીક્ષિતુઃ
અમૃતત્વં ભવતિ । યત્ર કુત્ર સ્થિતસ્ય શિરસિ
વ્યોમજ્યોતિર્દૃષ્ટં
ચેત્ સ તુ યોગી ભવતિ ॥ ૬॥

Commentary I.
બહિર્લક્ષ્યલક્ષણમાહ – અથેતિ । યોગી ભવતિ
ઇત્યાદિકૃત્સ્નોપનિષત્
પ્રાયશો મણ્ડલબ્રાહ્મણોપનિષદ્વ્યાખ્યાનેન વ્યાખ્યાતં
સ્યાદિતિ
મન્તવ્યં ॥ ૬॥

Text

મધ્યલક્ષ્યલક્ષણમ્

અથ મધ્યલક્ષ્યલક્ષણં
પ્રાતશ્ચિત્રાદિવર્ણાખણ્ડસૂર્યચક્રવત્ વહ્નિજ્વાલાવલીવત્
તદ્વિહીનાન્તરિક્ષવત્ પશ્યતિ । તદાકારાકારિતયા અવતિષ્ઠતિ ।
તદ્ભૂયોદર્શનેન ગુણરહિતાકાશં ભવતિ ।
વિસ્ફુરત્તારકાકારદીપ્યમાનગાઢતમોપમં પરમાકાશં
ભવતિ ।
કાલાનલસમદ્યોતમાનં મહાકાશં ભવતિ ।
સર્વોત્કૃષ્ટપરમદ્યુતિપ્રદ્યોતમાનં તત્ત્વાકાશં ભવતિ ।
કોટિસૂર્યપ્રકાશવૈભવસઙ્કાશં સૂર્યાકશં ભવતિ ।
એવં બાહ્યાભ્યન્તરસ્થવ્યોમપઞ્ચકં તારકલક્ષ્યં । તદ્દર્શી
વિમુક્તફલસ્તાદૃગ્વ્યોમસમાનો ભવતિ । તસ્માત્તારક એવ
લક્ષ્યમમનસ્કફલપ્રદં ભવતિ ॥ ૭॥

Commentary I.
અન્તર્બાહ્યલક્ષ્યસ્વરૂપમુક્ત્વા મધ્યલક્ષ્યસ્વરૂપમાહ – અથેતિ ।
તદ્દર્શી વિમુક્તસ્વાજ્ઞાનતત્કાર્યફલઃ । યસ્માદેવં તસ્માત્ ॥ ૭॥

Commentary II.
ઉક્તાનાં લક્ષ્યત્રયવ્યોમ્નાં ભૌતિકત્વશઙ્કા
નન્વિહ અન્તર્લક્ષ્યબાહ્યલક્ષ્યમધ્યલક્ષ્યલક્ષણેષુ
ઉચ્યમાનેષુ
નીલરક્તપીત્રચિત્રાદિવર્ણયુક્તવ્યોમદર્શનાનિ અવગમ્યન્તે ।
નૈતૈઃ
દર્શનૈઃ કિઞ્ચિદપિ મુમુક્ષોઃ પ્રયોજનં ભવિતુમર્હતિ । કુતઃ
નાનાવિધજ્યોતિર્વિષયકત્વેન ભૌતિકત્વાત્ । યદિ

બ્રહ્મજ્યોતિર્દર્શનં
સ્યાત્તદા ક્રમમુક્ત્યૈ વા તત્ ઉપયુક્તં સ્યાત્ । ન તુ તદેતત્ ।
બ્રહ્મણઃ
એવં નાનાવિધત્વાભાવાત્ । ભૌતિકાનિ તુ જ્યોતીંષિ
ઉપાધિભેદાત્
બહુવિધાનિ ભવિતુમર્હન્તિ । તસ્માત્
પ્રપઞ્ચિતલક્ષણબહુવિધજ્યોતિર્દર્શનાનિ સિદ્ધ્યર્થકાનિ સ્યુઃ ।
ઉપનિષદાં વૈયર્થ્યકલ્પનાનર્હત્વાત્ । ઇતિ ચેત્ –

તન્નિરસનેન એષાં મુમુક્ષૂપયોગિત્વનિર્ણયઃ

અત્રોચ્યતે । નિર્વિશેષસ્ય પરસ્ય બ્રહ્મણ એવ એતાનિ જ્યોતીંષિ
ઇતિ ।
કુતઃ ભૌતિકજ્યોતિષં દેહાદ્બહિઃ દર્શનીયત્વેન
દેહાન્તદર્શનાયોગ્યત્વાત્ । પ્રત્યગાત્મજ્યોતિષઃ એકરૂપત્વેઽપિ
વિવિધનાડીવન્નાડીસમ્બન્ધવશાત્ નાનાવર્ણોપપત્તેઃ ।
યથા
એકવૃત્તિમાનપ્યાત્મા નાનાનાડીસમ્બન્ધવશાત્
જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થાવિશેષૈઃ નાનાવિધઃ અનુભૂયતે
તદ્વત્ ।
યદ્યપિ એતેષાં જ્યોતિષામખણ્ડત્વેન દર્શનવિષયત્વાભાત્
ક્રમમુક્ત્યૈ
પરમ્પરયા સદ્યોમુક્ત્યૈ વા સાધનત્વણ્ સ્યાત્ । ન તુ સાક્ષાત્
સદ્યોમુક્ત્યૈ । ન તુ તાવતા સિદ્ધ્યાર્થકાનિ મુમુક્ષોઃ
અનુપયુક્તાનીતિ
વક્તું યુક્તં ॥ ૫-૭॥

Text

દ્વિવિધં તારકમ્

તત્તારકં દ્વિવિધં પૂર્વાર્ધં તારકમુત્તરાર્ધમમનસ્કં
ચેતિ । તદેષ શ્લોકો ભવેતિ –
તદ્યોગં ચ દ્વિધા વિદ્ધિ પૂર્વોત્તરવિધાનતઃ ।
પૂર્વં તુ તારકં વિદ્યાત્ અમનસ્કં તદુત્તરમિતિ ॥ ૮॥

Text

તારકયોગસિદ્ધિઃ

Ed . II. તારકયોગસ્ય સોમસૂર્યૈક્યદર્શનૈકફલકત્વં ।
અક્ષ્યન્તસ્તારયોઃ ચન્દ્રસૂર્યપ્રતિફલનં ભવતિ ।
તારકાભ્યાં
સૂર્યચન્દ્રમણ્ડલદર્શનં બ્રહ્માણ્ડમિવ
પિણ્ડાણ્ડશિરોમધ્યસ્થાકાશે રવીન્દુમણ્ડલદ્વિતયમસ્તીતિ
નિશ્ચિત્ય
તારકાભ્યાં તદ્દર્શનં । અત્રાપ્યુભયૈક્યદૃષ્ટ્યા મનોયુક્તં
ધ્યાયેત્ તદ્યોગાભાવે ઇન્દ્રિયપ્રવૃત્તેરનવકાશાત્ ।
તસ્માતન્તર્દૃષ્ટ્યા તારક એવાનુસંધેયઃ ॥ ૯॥

Commentary I.
બ્રહ્માણ્ડવત્ પિણ્ડાણ્ડેઽપિ રવીન્દૂ વિદ્યેતે ઇતિ નિશ્ચિત્ય
તારકાભ્યાં
તદૈક્યદર્શનતઃ તારકયોગસિદ્ધિઃ ભવેદિત્યાહ – અક્ષીતિ ॥

અયોગી
યથા બ્રહ્માણ્ડસ્થચન્દ્રસૂર્યૌ મનસ્સહકૃતતારકાભ્યાં
પશ્યતિ
તથા યોગી સ્વમસ્તકાકાશવિભાતરવીન્દુદ્વયં
મનસ્સહકૃતતારાભ્યાં
અવલોકયેદિત્યર્થઃ । રૂપદર્શનસ્ય ચક્ષુરધીનત્વાત્ કિં
મનસેત્યત
આહ – તદિતિ । મનસિ અન્યત્ર વ્યાપૃતે રૂપાદિગ્રહણશક્તિઃ
ચક્ષુરાદેઃ
નાસ્તીત્યત્ર અન્યત્રમના અભૂવં નાદર્શમન્યત્રમના અભૂવં
નાશ્રૌષમિત્યાદિશ્રુતેઃ । યસ્માદેવં તસ્માત્ ॥ ૯॥

Commentary II.
નનુ નિર્ગુણાકાશં પરમાકાશં મહાકાશં તત્ત્વાકાશં
સૂર્યાકાશં ચેતિ તારકલક્ષ્યં આકાશપઞ્ચકમભિધીયતે ।
અત્ર
કથં પૂર્વોત્તરાર્ધવિભાગઃ ઇતિ । અત્રોચ્યતે ।
ઉભયૈક્યદૃષ્ટ્યા

મનોયુક્તં ધ્યાયેતિતિ તાર એવાનુસન્ધ્યેયઃ । ઇતિ ચ
ધ્યાનયોગાભ્યાસસ્ય
વિહિતત્વાત્ । તદભ્યાસકાલઃ પૂર્વાર્ધઃ તારકયોગસંજ્ઞકઃ
તત્ફલીભૂતજ્યોતિર્દૃશનકાલઃ ઉત્તરાર્ધઃ
અમનસ્કયોગસંજ્ઞકઃ ।
એવમેવ ચ આકાશપઞ્ચકદર્શને પૂર્વોત્તરવિભાગો મન્તવ્યઃ ॥ ૯॥

Text

મૂર્તામૂર્તભેદેન દ્વિવિધમનુસન્ધેયમ્
તારકં દ્વિવિધં મૂર્તિતારકં અમૂર્તિતારકં ચેતિ ।
યતિન્દ્રિયાન્તં તત્ મૂર્તિમત્ । યત્ ભ્રૂયુગાતીતં તત્ અમૂર્તિમત્ ।
સર્વત્ર અન્તઃપદાર્થવિવેચને મનોયુક્તાભ્યાસ ઇષ્યતે ।
તારકાભ્યં
તદૂર્ધ્વસ્થસત્ત્વદર્શનાત્ મનોયુક્તેન અન્તરીક્ષણેન
સચ્ચિદાનન્દસ્વરૂપં બ્રહ્મૈવ । તસ્માત્ શુક્લતેજોમયં બ્રહ્મેતિ
સિદ્ધં ।
તદ્બ્રહ્મ મનઃસહકારિચક્ષુષા અન્તર્દૃષ્ટ્યા વેદ્યં ભવતિ ।
એવમમૂર્તિતારકમપિ । મનોયુક્તેન ચક્ષુષૈવ દહરાદિકં
વેદ્યં
ભવતિ રૂપગ્રહણપ્રયોચનસ્ય મનશ્ચક્ષુરધીનત્વાત્
બાહ્યવદાન્તરેઽપિ આત્મમનશ્ચક્ષુઃસંયોગેનૈવ
રૂપગ્રહણકાર્યોદયાત્ ।
તસ્માન્મનોયુક્તા અન્તર્દૃષ્ટિઃ તારકપ્રકાશાય ભવતિ ॥ ૧૦॥

Commentary I.

યદનુસન્ધેયં તત્ કતિવિધમિત્યત્ર તત્તારકં ॥

બાહ્યપદાર્થવિવેચનવત્ અન્તઃપદાર્થવિવેચનમપિ
મનશ્ચક્ષુરધીનમિત્યાહ – સર્વત્રેતિ ।
તદૂર્ધ્વસ્થસત્ત્વદર્શનાત્
ભ્રૂમધ્યોર્ધ્વવિલસિતોત્તરતારકલક્ષ્યદર્શનાત્ ।
કેનૈતદ્દર્શનીયમિત્યત્ર મનોયુક્તેનેતિ । બ્રહ્મૈવ
ઉત્તરતારકલક્ષ્યમિત્યનુસંધેયં । યસ્માદેવં તસ્માત્ ।
ભ્રૂમધ્યાદિસ્થલવિલસિત્શુક્લતેજસો મનઃકલ્પિતત્વેઽપિ

બ્રહ્મણઃ
સર્વવ્યાપકત્વેન તત્રાપિ વિદ્યમાનત્વાત્ તદેવ બ્રહ્મેતિ
અભિમતિદ્રઢિમ્ના
લીને તત્ર મનસિ કલ્પકસાપેક્ષકલ્પનાવૈરળયે નિર્વિકલ્પકં
બ્રહ્મૈવ
અવશિષ્યતે ઇત્યર્થઃ । યત્તેજો મનઃકલ્પિતં તદ્બ્રહ્મ ।
યસ્માદેવં તસ્માત્ ॥ ૧૦॥

Commentary II.
મૂર્તિતારકામૂર્તિતારકયોશ્ચ
ઇન્દ્યાન્તભ્રૂયુગાતીતત્વકથનેન
સગુણમૂર્તિધ્યાનપરત્વં ચાવગન્તવ્યં । સગુણમૂર્તિધ્યાનસ્ય
ચ
નિષ્કામકૃતસ્ય ચ ક્રમમુક્તિચિત્તશુદ્ધિપ્રયોજનતયા
સુપ્રસિદ્ધત્વાત્ ॥ ૧૦॥

Text

તારકયોગસ્વરૂપં
ભ્રૂયુગમધ્યબિલે દૃષ્ટિં તદ્દ્વારા ઊર્ધ્વસ્થિતતેજ
આવિર્ભૂતં
તારકયોગો ભવતિ । તેન સહ મનોયુક્તં તારકં સુસંયોજ્ય
પ્રયત્નેન
ભ્રૂયુગ્મં સાવધાનતયા કિઞ્ચિદૂર્ધ્વમ્ત્ક્ષેપયેત્ । ઇતિ
પૂર્વતારકયોગઃ । ઉત્તરં તુ અમૂર્તિમતમનસ્કમિત્યુચ્યતે ।
તાલુમૂલોર્ધ્વભાગે મહાન્ જ્યોતિર્મયૂખો વર્તતે । તત્
યોગિભિર્ધ્યેયં ।
તસ્માતણિમાદિસિદ્ધિર્ભવતિ ॥ ૧૧॥

Commentary I.
કોઽયં તારકયોગ ઇત્યત્ર ભ્રૂયુગમધ્યબિલે તત્રત્યાજ્ઞાચક્રે
દૃષ્ટિયુગ્મં સંનિવેશ્ય । સાવધાનતયા વિલોકયન્ । ધ્યેયં
તજ્જ્યોતિઃ બ્રહ્મેતિ યોગિભિશ્ચિન્ત્યમિત્યર્થઃ । તતઃ કિં
ભવતીત્યત્ર
તસ્માદિતિ ॥ ૧૧॥

Commentary II.

પ્રકૃતયોગે પૂર્ણમનોવિલયાભાવેન દૃશ્યમાનજ્યોતિષઃ
પ્રત્યગાત્મસ્વરૂપત્વનિર્ણયઃ
ઇદં જ્યોતિઃ ત્વંપદાર્થઃ આહોસ્વિત્ તત્પદાર્થઃ ઇતિ
સંશીયતે ।
કુતઃ સંશયઃ ત્વંપદાર્થવિવેચન ઇતિ સચ્ચિદાનન્દસ્વરૂપં
બ્રહ્મૈવેતિ ચ ઉક્તત્વાત્ । અત્રોચ્યતે । ત્વંપદાર્થઃ
પ્રત્યગાત્મૈવ ।
બ્રહ્માંશત્વાત્તુ બ્રહ્મત્વમુપચર્યતે સાક્ષાદ્બ્રહ્મયોગો હિ
મનોવિયુક્તાભ્યાસરૂપઃ । તત્રૈવ મનોનાશસમ્ભવાત્ ।
મનોયુક્તાભ્યાસસ્તુ પ્રકૃતઃ કણ્ઠરવોક્તઃ ।
મનસ્સહકારિચક્ષુષા
વેદ્યં ભવતીતિ ચ । યદિ મનસૈવ વેદ્યમિત્યુક્તં તદા
અન્તર્દૃષ્ટેઃ
મનોઽનન્યત્વાત્ મનસઃ બ્રહ્મણિ વિલયસમ્ભવાચ્ચ
અખણ્ડબ્રહ્મયોગ
એવ વિવક્ષિતઃ ઇતિ વક્તું શક્યં । ન તુ તદસ્તિ ।
પ્રત્યગાત્મયોગે ચ
આન્તરે બાહ્યવત્ આત્મમનશ્ચક્ષુસ્સંયોગેનૈવ
રૂપગ્રહણકાર્યોદયઃ
સ્યાત્ । ન તુ બ્રહ્મયોગે તદીયાખણ્ડસમ્યગ્દર્શનં
ચક્ષુરધીનં
મનોઽદીનં વા ભવતિ । ચક્ષુર્મનસી પૃષ્ઠતઃ કૃત્વા
સ્વયંપ્રકશમાનત્વાત્ । નનુ મનોયુક્તાન્તર્દૃષ્ટિરિત્યુક્તત્વાત્
મનસઃ
અન્તર્દૃષ્ટિદ્વારા બ્રહ્મણિ વિલય એવ અર્થાદવગમ્યતે ઇતિ ચેન્ન ।
બહ્યવદિત્યુક્તત્વેન પ્રકૃતયોગે મનોવિલયાસમ્ભવાત્ ।
તાત્કાલિકસ્તુ
મનોલયઃ સુષુપ્તસ્યેવ નાત્યન્ત શ્લાઘ્યતમો ભવિતુમર્હતિ ।
યદ્વા
ક્રમમુક્તિસાધનીભૂતોઽપિ સ મનોલયઃ

પુનર્જન્મબીજભર્જનાભાવાત્
ન નાશાપરપર્યાયઃ ઇત્યવગન્તવ્યં ॥ ૧૧॥

Text

શામ્ભવીમુદ્રા

અન્તર્બાહ્યલક્ષ્યે દૃષ્ટૌ નિમેષોન્મેષવર્જિતાયાં સત્યં
સાંભવી મુદ્રા ભવતિ । તન્મુદ્રારૂઢજ્ઞાનિનિવાસાત્ ભૂમિઃ
પવિત્રા ભવતિ । તદ્દૃષ્ટ્યા સર્વે લોકાઃ પવિત્રા ભવન્તિ ।
તાદૃશપરમયોગિપૂજા યસ્ય લભ્યતે સોઽપિ મુક્તો ભવતિ ॥ ૧૨॥

Commentary I.

યત્યોગિભિઃ ધ્યેયમુક્તં પર્યવસાને તદેવ સાંભવી મુદ્રા
ભવતીત્યાહ અન્તરિતિ ॥ મુદ્રા ભવતિ ઇત્યત્ર
અન્તર્લક્ષ્યં બહિર્દૃષ્ટિઃ નિમેષોન્મેષવર્જિતા ।
એષા સા શામ્ભવી મુદ્રા સર્વતન્ત્રેષુ ગોપિતા ॥

ઇતિ શ્રુતેઃ । તન્મુદ્રારૂઢયોગિનં સ્તૌતિ – તદિતિ । પવિત્રા
ભવતિ
ઇત્યત્ર સ્વપાદન્યાસમાત્રેણ પાવયન્ વસુધાતલં ઇતિ
સ્વરૂપદર્શનોક્તેઃ । પવિત્રા ભવન્તિ –
સ્વેચરા ભૂચરાઃ સર્વે બ્રહ્મવિદ્દૃષ્ટિગોચરાઃ ।
સદ્ય એવ વિમુચ્યન્તે કોટિજન્માર્જિતૈરઘૈઃ ॥

ઇતિ શ્રુતેઃ ॥ ૧૨॥

Text

અન્તર્લક્ષ્યવિકલ્પાઃ

અન્તર્લક્ષ્યજ્વલજ્જ્યોતિઃસ્વરૂપં ભવતિ । પરમગુરૂપદેશેન
સહસ્રારજ્વલજ્જ્યોતિર્વા બુદ્ધિગુહાનિહિતચિજ્જ્યોતિર્વા
ષોડશાન્તસ્થતુરીયચૈતન્યં વા અન્તર્લક્ષ્યં ભવતિ ।
તદ્દર્શનં
સદાચાર્યમૂલં ॥ ૧૩॥

Commentary I.

અન્તર્લક્ષ્યં વિકલ્પ્ય નિર્ધારયતિ – પરમેતિ ॥ ઉક્તવિકલ્પાનાં
એકાર્થપર્યવસાયિત્વાત્ તદ્દર્શનમૂલં કિમિત્યત્ર –

તદ્દર્શનમિતિ ॥ ૧૩॥

Text

આચાર્યલક્ષણમ્

આચાર્યો વેદસમ્પન્નો વિષ્ણુભક્તો વિમત્સરઃ ।
યોગજ્ઞો યોગનિષ્ઠશ્ચ સદા યોગાત્મકઃ શુચિઃ ॥ ૧૪॥

ગુરુભક્તિસમાયુક્તઃ પુરુષજ્ઞો વિશેષતઃ ।
એવં લક્ષણસમ્પન્નો ગુરુરિત્યભિધીયતે ॥ ૧૫॥

ગુશબ્દસ્ત્વન્ધકારઃ સ્યાત્ રુશબ્દસ્તન્નિરોધકઃ ।
અન્ધકારનિરોધિત્વાત્ ગુરુરિત્યભિધીયતે ॥ ૧૬॥

ગુરુરેવ પરં બ્રહ્મ ગુરુરેવ પરા ગતિઃ ।
ગુરુરેવ પરા વિદ્યા ગુરુરેવ પરાયણં ॥ ૧૭॥

ગુરુરેવ પરા કાષ્ઠા ગુરુરેવ પરં ધનં ।
યસ્માત્તદુપદેષ્ટાઽસૌ તસ્માદ્ગુરુતરો ગુરુરિતિ ॥ ૧૮॥

Commentary I.

આચાર્યલક્ષણમુક્ત્વા ગુરુશબ્દાર્થમાહ – ગુશબ્દસ્ત્વિતિ ॥ ૧૪-૧૮॥

Commentary II.

પરમાત્મદર્શનાઙ્ગભૂતપ્રત્યગાત્મદર્શનસ્ય સર્વથા
અનુપેક્ષણીયત્વોદ્ઘોષઃ
નન્વિહ તાદૃશપરમયોગિપૂજા યસ્ય લભ્યતે સોઽપિ મુક્તો
ભવતીતિ
એતાદૃશાનિ વાક્યાનિ અર્થવાદાઃ એવસ્યુઃ । કુતઃ
સહસ્રારજ્વલજ્જ્યોતિર્વા –
ઇત્યાદિવાક્યોક્તદેહપરિચ્છિન્નજ્યોતિર્માત્રે
પર્યવસન્નાયાઃ અસ્યાઃ ઉપનિષદ આદ્યન્તપર્યાલોચનેઽપિ
અપરિચ્છિન્નબ્રહ્માત્મૈક્યયોગસ્ય ક્વચિદપિ અનુક્તત્વાત્ । ઇતિ ચેત્ –
અત્રોચ્યતે ।
સત્યમેવૈતત્ । ત્વંપદલક્ષ્યાર્થસિદ્ધ્યા
અહંપદલક્ષ્યાર્થસ્યાપિ
સિદ્ધિત્વેન કૈમુતિકન્યાયાત્ બ્રહ્મપદાર્થસિદ્ધેઃ કથં
ત્વમહંપદાર્થયોઃ ભેદઃ નાયં દોષઃ । ત્વં પદસ્ય

ખણ્ડપ્રત્યગાત્માર્થકત્વાત્ । અહંપદસ્ય
તત્ત્વમસિવાક્યાર્થજ્ઞાનોદયાનન્તરં
અખણ્ડબ્રહ્મયોગાભ્યાસાર્થં
ગ્રાહ્યત્વેન અખણ્ડપ્રત્યગાત્માર્થકત્વાચ્ચ ત્વમહંપદયોઃ
ભેદસ્ય
વિસ્પષ્ટત્વાત્ । તસ્માદત્ર ઉક્તયોગિનઃ સદ્યોમુક્ત્યભાવેન
ઔપચરિકપરમત્ત્વેન ચ પ્રકૃતવાક્યાનિ અર્થવાદા એવ । તથાપિ
સ્વદેહાન્તર્વર્તિજ્યોતિર્દર્શનં વિના તત્ત્વમસિ ઇતિ
ઉપદિશતામહં
બ્રહ્માસ્મીતિ વાઙ્માત્રેણ પ્રલપતાં ચ ભ્રાન્તતમાનાં
કલ્પકોટિષ્વપિ સંસારબન્ધાન્મોક્ષાસમ્ભવાત્
મોક્ષપ્રથમસાધનત્વાચ્ચાસ્ય દર્શનસ્ય ઉપેક્ષા ન કદાપિ
કાર્યા ઇતિ
સ્થિતં ॥ ૧૨-૧૮॥

Text

ગ્રન્થાભ્યાસફલમ્

યઃ સકૃદુચ્ચારયતિ તસ્ય સંસારમોચનં ભવતિ ।
સર્વજન્મકૃતં પાપં તત્ક્ષણાદેવ નશ્યતિ । સર્વાન્
કામાનવાપ્નોતિ ।
સર્વપુરુષાર્થસિદ્ધિર્ભવતિ । ય એવં વેદેત્યુપનિષત્ ॥ ૧૯॥

Commentary I.

ગ્રન્થતદર્થપઠનાનુસન્ધાનફલમહા – ય ઇતિ ॥

કામાકામધિયાં
પઠનફલં સર્વકામાપ્તિઃ પરમપુરુષાર્થાપ્તિશ્ચ ।
ઇત્યુપનિષચ્છબ્દઃ અદ્વયતારકોપનિષત્સમાપ્ત્યર્થઃ ॥ ૧૯॥

શ્રીવાસુદેવેન્દ્રશિષ્યોપનિષદ્બ્રહ્મયોગિના ।
અદ્વયોપનિષદ્વ્યાખ્યા લિખિતેશ્વરગોચરા ।
અદ્વયોપનિષદ્વ્યાખ્યાગ્રન્થોઽશીતિરિતીરિતઃ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

ઇતિ શ્રીમદીશાદ્યષ્ટોત્તરશતોપનિષચ્છાસ્ત્રવિવરણે
ત્રિપઞ્ચાશત્સઙ્ખ્યાપૂરકં અદ્વયતારકોપનિષદ્વિવરણં
સમ્પૂર્ણં ।
ઇતિ શ્રીમત્સુન્દરેશ્વરતાતાચાર્યશિષ્યાપ્પયશિવાચાર્યકૃતિષુ
અદ્વયતારકોપનિષદ્ભાષ્યં સમાપ્તં ॥ ૐ ॥

ૐ શ્રીમદ્વિશ્વાધિષ્ઠનપરમહંસસદ્ગુરુરામચન્દ્રાર્પણમસ્તુ ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com.

---

*advayatAraka*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*